वर्षमर्यादागिरयो नद्यः सप्त सप्तैव” इत्युक्त्वा “अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्नि-जष्टतिरिति” भाग०५।२०।१८। उक्तम्। निजा धृतिरस्य। २स्वभावतो धैर्य्यान्विते त्रि०। [नि वः। निजिमान्।

**निजि** त्रि० निज–मत्वर्थे कि। शुद्धिमति। अतोयवा० मस्य

**निटल** पु० नि+टल–अच्। कपाले भालस्थले शब्दार्थकल्प-तरुः “राजा निटलतले चुम्बितनिजचरणाम्बुजैः” दशकु०।

**निटलाक्ष** पु० निटले भाले अक्षि अस्य षच्स०। शिवे शब्दार्थकल्प० “दोषकृक्षेण निटलाक्षेण दूरीकृतचेतने मकरध्वजेतने” दशकुमा०।

**निडीन** न० नीचैर्डीनम्। भक्ष्यमाश्रयं वा दृष्ट्वा अधःपतन रूपे खगगतिभेदे खगगतिशब्दे २४१४ पृ० दृश्यम्।

**निण्डिका** स्त्री मतीलायां (तेओयाडा) कलायभेदे शब्दच०।

**निण्य** त्रि० अन्तर्हिते निघण्टुः “निण्यः संनद्धो मनसा चरामि” ऋ०१।१६४।३७

**नितत्नी** स्त्री ओषधिभेदे “देवी देव्यामधिजाता पृथिव्याम-स्योषधे!। तां त्वा नितत्नि! केशेभ्यः” अथ० ६।१३६।१

**नितम्ब** पु० नि+तम्ब–अच्, निभृतं तम्यते काम्यते कामुकैः नितरां ताम्यति सुरतमर्दात् तम–बा० ब वा। स्त्रीणां पश्चात् १कटितटे अमरः २स्कन्धे ३कूले ४कल्या अधोभागे कटके (पर्वतमध्यस्थाने) ५कटिमात्रे च मेदि०। “तरुणालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः” विदग्ध० “नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत्” रघुः “गिरेर्नितम्बे मरुता विभिन्नम्” भट्टिः “सेव्यो नितम्बः किमु भूधराणां विलासिनीनाम्” सा०द०।

**नितम्बिन्** त्रि० नितम्ब+अस्त्यर्थे इनि। १नितम्बयुक्ते “मेखलागुणपदैर्नितम्बिभिः” रघुः। प्राशस्त्ये इनि। २प्रशस्तनितम्बयुक्तायां स्त्रियां स्त्री ङीप्। “नितम्बिनी-मिच्छसि मुक्तलज्जाम्” कुमा०।

**नितम्भू** पु० ऋषिभेदे “नितम्भूर्भयनो धौम्यः शतानन्दो-ऽकृतव्रणः” भा०अनु०२६अ० नामनिर्देशकथने

**नितराम्** अव्य०नि+तरप् आमु। १सुतरामित्यर्थे २अतिशये च “सुतरां लदन्ति चेतो नितरां विवादिनाम्” रूढस० “तेभ्यो नितरां विरतिः” वेदा०।

**नितल** न० निकृष्टं तलमधोभागः प्रा०स०। पातालभेदे शब्द-रत्ना० “सुतलं वितलञ्चैव नितलञ्च गभस्तिमत्। महा-यमतलञ्चापि पातालञ्चापि सप्तमम्” पुराणस० विष्णु०।

**नितान्त** न०नितास्यति स नि+तम–क्त। १एकान्ते २अत्यन्ते अमरः। “निद्राविनोदितनितान्तरतिक्लमानाम्” किरा० “नितान्तदीर्घैर्जनिता तपोभिः” कुमा०।

**नित्य** त्रि० नियमेन नियतं वा भवं नि+त्यप्। १सतते अमरः। अहरहः क्रियमाणत्वेन २विधिबोधिते ३प्रत्यवायसाधनाभावप्रतियोगिनि कर्मणि यथा अहरहः सन्ध्यामुपासीतेति अत्र सन्ध्याभावे प्रत्यवायसाधनत्वबोधः। ४अविच्छिन्नपरम्पराके च यथा वर्णा नित्याः। ५उत्पत्तिविनाशरहिते ६शाश्वते कालत्रयस्थे वस्तुनि च त्रि० ७समुद्रे पु० राजनि०। शास्त्रबोधितसदातनकर्त्तव्यताकं च नित्यं तद्बोधकं ति०त० समाहृत्योक्तं यथा “नित्यं१ सदा२ यावदायुः३र्न कदाचिदतिक्रमेत्४। उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात्। फलाश्रुतेर्वीप्सया च तन्नित्यमिह कीर्त्तितम्”। अत्र पूर्वार्द्धोक्तार्थकशब्दाः स्वान्वितपदार्थस्य नित्यत्वबोधकाः। उत्तरश्लोकबोध्यार्थास्तु परम्परया नित्यतासमर्पका इति भेदः “तस्मादस्मिन् सदायुक्तो नित्यं स्यादात्मवान् द्विजः” “विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु” मनुः नित्यत्वञ्च ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वम् तेन उत्पत्तिविनाशशून्यत्वात् कालत्रयस्थत्वं गम्यते।

**नित्यकर्मन्** न०कर्म०। विहिते कर्मभेदे “नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा। गृहस्थस्य त्रिधा कर्म तन्निबोधय पुत्रक!। पञ्चयज्ञादिकं नित्यं यदेतत् कथितं तव। नैमित्तिकं तथा चान्यत् पुत्रजन्मक्रियादिकम्। नित्यनैमित्तिकं ज्ञेयं पर्वश्राद्धादि पण्डितैः” आ०त० मार्क०पु० तत्त्यागे दोषो यथा “नित्यानां कर्मणां विप्र! तस्य हानिरहर्निशम्। अकुर्वन् विहितं कर्म शक्तः पतति तद्दिने। प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि। पक्षं नित्यक्रियाहानेः कर्त्ता भवेत मानवः। संवत्सरं क्रियाहानिर्यस्य पुंसोऽभिजायते। तस्यावलोकनात् सूर्य्यो निरीक्ष्यः साधुभिः सदा। स्पृष्टे स्नानं सचेलस्य शुद्धिर्हेतुर्महात्मने!। पुंसो भवति तस्योक्ता न शुद्धिः पापकर्मणः” इति विष्णु पु०। अत्रादौ नित्यकर्मकरणनिषेधो यथा “जातमृते मृतजे जाते नित्यकर्म न चाचरेत्। सूतके च मलमासे क्षुरकर्मणि मैथुने। धूमोद्गारे तथा वान्तौ नित्यं कर्माणि संत्यजेत्। द्रव्ये भुक्ते त्वजीर्णे च नैव मुक्ता च किञ्चन। कर्म कुर्य्यान्नरो नित्यं सूतके